श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवामन पुराणे

# ॥ श्री दधिवामनस्तोत्रम् ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री दधिवामनस्तोत्रम् ॥

हेमाद्रिशिखराकारं शुद्धस्फटिकसन्निभम्।
पूर्णचन्द्रनिभं देवं द्विभुजं वामनं स्मरेत्॥ १ ॥

पद्मासनस्थं देवेशं चन्द्रमण्डलमध्यगम्।
ज्वलत्कालानलप्रख्यं तडित्कोटिसमप्रभम्॥ २ ॥

सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम्।
चन्द्रमण्डलमध्यस्थं विष्णुमच्युतमव्ययम्॥ ३ ॥

श्रीवत्सकौस्तुभोरस्कं दिव्यरत्नविभूषितम्।
पीताम्बरमुदाराङ्गं वनमालाविभूषितम्॥ ४ ॥

सुन्दरं पुण्डरीकाक्षं किरीटेन विराजितम्।
षोडशस्त्रीपरिवृतमप्सरोगणसेवितम्॥ ५ ॥

ऋग्यजुःसामाथर्वाद्यैः गीयमानं जनार्दनम्।
चतुर्मुखाद्यैर्देवेशैः स्तोत्राराधनतत्परैः॥ ६ ॥

सनकाद्यैर्मुनिगणैः स्तूयमानमहर्निशम्।
त्रियम्बको महादेवो नृत्यते यस्य सन्निधौ॥ ७ ॥

दधिमिश्रान्नकवलं रुक्मपात्रं च दक्षिणे।
करे तु चिन्तयेद्वामे पीयूषममलं सुधीः॥ ८ ॥

साधकानां प्रयच्छन्तमन्नपानमनुत्तमम्।
ब्राह्मे मुहूर्ते चोत्थाय ध्यायेद्देवमधोक्षजम्॥ ९ ॥

अतिसुविमलगात्रं रुक्मपात्रस्थमन्नं
सुललितदधिखण्डं पाणिना दक्षिणेन।

www.prapatti.com

कलशममृतपूर्णं वामहस्ते दधानं
तरति सकलदुःखाद्वामनं भावयेद्यः॥ १०॥

क्षीरमन्नमन्नदाता लभेदन्नाद एव च।
पुरस्तादन्नमाप्नोति पुनरावर्तिवर्जितम्।
आयुरारोग्यमैश्वर्यं लभते चान्नसम्पदः॥ ११॥

इदं स्तोत्रं पठेद्यस्तु प्रातःकाले द्विजोत्तमः।
अक्लेशादन्नसिद्ध्यर्थं ज्ञानसिद्ध्यर्थमेव च॥ १२॥

अभ्रश्यामः शुभ्रयज्ञोपवीती
सत्कौपीनः पीतकृष्णाजिनश्रीः।
छत्री दण्डी पुण्डरीकायताक्षः
पायाद्देवो वामनो ब्रह्मचारी॥ १३॥

अजिनदण्डकमण्डलु मेखला-
रुचिरपावनवामनमूर्तये।
मितजगत्त्रितयाय जितारये
निगमवाक्पटवे वटवे नमः॥ १४॥

श्रीभूमिसहितं दिव्यं मुक्तामणिविभूषितम्।
नमामि वामनं विष्णुं भुक्तिमुक्तिफलप्रदम्॥ १५॥

वामनो बुद्धिदाता च द्रव्यस्थो वामनः स्मृतः।
वामनस्तारकोभाभ्यां वामनाय नमो नमः॥ १६॥

॥ इति श्री दधिवामनस्तोत्रं संपूर्णम्॥



www.prapatti.com